श्रीवेङ्कटेशाष्टोत्तरशतनामावली २

{॥ श्रीवेङ्कटेशाष्टोत्तरशतनामावली २ ॥}

ॐ श्री वेङ्कटेशाय नमः ।

ॐ शेषाद्रिनिलयाय नमः ।

ॐ वृषद्दृग्गोचराय नमः ।

ॐ विष्णवे नमः ।

ॐ सदञ्जनगिरीशाय नमः ।

ॐ वृषाद्रिपतये नमः ।

ॐ मेरुपुत्रगिरीशाय नमः ।

ॐ सरस्वामितटीजुषे नमः ।

ॐ कुमारकल्पसेव्याय नमः ।

ॐ वज्रिदृग्विषयाय नमः । १०

ॐ सुवर्चलासुतन्यस्तसेनापत्यभराय नमः ।

ॐ रमाय नमः ।

ॐ पद्मनाभाय नमः ।

ॐ सदावायुस्तुताय नमः ।

ॐ त्यक्तवैकुण्ठलोकाय नमः ।

ॐ गिरिकुञ्जविहारिणे नमः ।

ॐ हरिचन्दनगोत्रेन्द्रस्वामिने नमः ।

ॐ शङ्खराजन्यनेत्राब्जविषयाय नमः ।

ॐ वसूपरिचरत्रात्रे नमः ।

ॐ कृष्णाय नमः । २०

ॐ अब्धिकन्यापरिष्वक्तवक्षसे नमः ।

ॐ वेङ्कटाय नमः ।

ॐ सनकादिमहायोगिपूजिताय नमः ।

ॐ देवजित्प्रमुखानन्तदैत्यसङ्घप्रणाशिने नमः ।

ॐ श्वेतद्वीपवसन्मुक्तपूजिताङ्घ्रियुगाय नमः ।

ॐ शेषपर्वतरूपत्वप्रकाशनपराय नमः ।

ॐ सानुस्थापिततार्क्ष्याय नमः ।

ॐ तार्क्ष्याचलनिवासिने नमः ।

ॐ मायामूढविमानाय नमः ।

ॐ गरुडस्कन्धवासिने नमः । ३०

ॐ अनन्तचरणाय नमः ।

ॐ अनन्तशिरसे नमः ।

ॐ अनताक्षाय नमः ।

ॐ श्रीशैलनिलयाय नमः ।

ॐ दामोदराय नमः ।

ॐ नीलमेघतिभाय नमः ।

ॐ ब्रह्मादिदेवदुर्दर्शविश्वरूपाय नमः ।

ॐ वैकुण्ठागतसद्धेमविमानान्तर्गताय नमः ।

ॐ अगस्त्याभ्यर्चितशेषजनदृग्गोचराय नमः ,

ॐ वासुदेवाय नमः । ४०

ॐ हरये नमः ।

ॐ तीर्थपञ्चकवासिने नमः ।

ॐ वामदेवप्रियाय नमः ।

ॐ जनकेष्टप्रदाय नमः ।

ॐ मार्कण्डेयमहातीर्थजातपुण्यप्रदाय नमः ।

ॐ वाक्पतिब्रह्मदात्रे नमः ।

ॐ चन्द्रलावण्यदायिने नमः ।

ॐ नारायणनगेशाय नमः ।

ॐ ब्रह्मक्लृप्तोत्सवाय नमः ।

ॐ शङ्खचक्रवरानम्रलसत्करतलाय नमः । ५०

ॐ द्रवन्मृगमदासक्तविग्रहाय नमः ।

ॐ केशवाय नमः ।

ॐ नित्ययौवनमूर्तये नमः ।

ॐ अर्थितार्थप्रदात्रे नमः ।

ॐ विश्वतीर्थाघहारिणे नमः ।

ॐ तीर्थस्वामिसरस्नातमनुजाबीष्टदायिने नमः ।

ॐ कुमारधारिकावासस्कन्दाभीष्टप्रदायिने नमः ।

ॐ जानुदघ्नसमुद्भूतपोत्रिणे नमः ।

ॐ कूर्ममूर्तये नमः ।

ॐ किन्नरद्वन्द्वशापान्तप्रदात्रे नमः । ६०

ॐ विभवे नमः ।

ॐ वैखानसमुनिश्रेष्ठपूजिताय नमः ।

ॐ सिंहाचलनिवासाय नमः ।

ॐ श्रीमन्नारायणाय नमः ।

ॐ सद्भक्तनीलकण्ठार्च्यनृसिंहाय नमः ।

ॐ कुमुदाक्षगणश्रेष्ठसेनापत्यप्रदाय नमः ।

ॐ दुर्मेधप्राणहन्त्रे नमः ।

ॐ श्रीधराय नमः ।

ॐ क्षत्रियान्तकरामाय नमः ।

ॐ मत्स्यरूपाय नमः । ७०

ॐ पाण्डवारिप्रहर्त्रे नमः ।

ॐ श्रीकराय नमः ।

ॐ उपत्यकाप्रदेशस्थशङ्करध्यातमूर्तये नमः ।

ॐ रुक्माब्जसरसीकूललक्ष्मीकृततपस्विने नमः ।

ॐ लसल्लक्ष्मीकराम्भोजदत्तकह्लाकसृजे नमः ।

ॐ सालग्रामनिवासाय नमः ।

ॐ शुकदृग्गोचराय नमः ।

ॐ नारायणार्थिताशेषजनदृग्विषयाय नमः ।

ॐ मृगयारसिकाय नमः ।

ॐ वृषभासुरहारिणे नमः । ८०

ॐ अञ्जनागोत्रपतये नमः ।

ॐ वृषभाचलवासिने नमः ।

ॐ अञ्जनासुतदात्रे नमः ।

ॐ माधवीयाघहारिणे नमः ।

ॐ प्रियङ्गुप्रियभक्षाय नमः ।

ॐ श्वेतकोलपराय नमः ।

ॐ नीलधेनुपयोधारासेकदेहोद्भवाय नमः ।

ॐ शङ्करप्रियमित्राय नमः ।

ॐ चोलपुत्रप्रियाय नमः ।

ॐ सुधर्मिणीसुचैतन्यप्रदात्रे नमः । ९०

ॐ मधुघातिने नमः ।

ॐ कृष्णाख्यविप्रवेदान्तदेशिकत्वप्रदाय नमः ।

ॐ वराहाचलनाथाय नमः ।

ॐ बलभद्राय नमः ।

ॐ त्रिविक्रमाय नमः ।

ॐ महते नमः ।

ॐ हृषीकेशाय नमः ।

ॐ अच्युताय नमः ।

ॐ नीलाद्रिनिलयाय नमः ।

ॐ क्षीराब्धिनाथाय नमः । १००

ॐ वैकुण्ठाचलवासिने नमः ।

ॐ मुकुन्दाय नमः ।

ॐ अनन्ताय नमः ।

ॐ विरिञ्चाभ्यर्थितानीतसौम्यरूपाय नमः ।

ॐ सुवर्णमुखरीस्नातमनुजाभीष्टदायिने नमः ।

ॐ हलायुधजगत्तीर्थसमन्तफलदायिने नमः ।

ॐ गोविन्दाय नमः ।

ॐ श्रीनिवासाय नमः । १०८

इति वराहपुराणान्तर्गत

श्रीवेङ्कटेश्वराष्टोत्तरशतनामावलिः समाप्ता ॥

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Venkateshwara Ashtottara Shatanamavali 3 Lyrics in Devanagari PDF
% File name : venkat108ver2.itx
% Category : aShTottarashatanAmAvalI
% Location : doc_vishhnu
% Author : Vyasa by traditon
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Sunder Hattangadi sunderh at hotmail.com
% Proofread by : Sunder Hattangadi sunderh at hotmail.com
% Description-comments : Varaha Purana Not clearly found in print
% Latest update : Jan. 23, 2003, March 24, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website